# हनूमत्प्रभावः

## आमुखम्

आदिकाव्यं रामायणं वाल्मीकिमहर्षिणा रचितं भवति। अस्य किष्किन्धाकाण्डाद् उद्धृतः कश्चिद् भागः 'हनूमत्प्रभावः' इति नाम्ना पाठेऽस्मिन् योजितः।

रामेण कृतं वनवासं, रावणेन कृतं सीतापहरणञ्च वयं जानीमः। सीतान्वेषणाय रामः सुग्रीवादीनां साहाय्यं प्राप्नोति। एवं सीताम् अन्विष्य वानराः चतसृषु दिक्षु भ्रमन्ति। जडायुवचनात् सीता रावणेन अपहृतेति जानन्ति। जाम्बवतः नेतृत्वे केचन वानराः दक्षिणदेशे समुद्रतीरं समागच्छन्ति। समुद्रलङ्घनेन एव लङ्कागमनं, सीतादर्शनञ्च साध्यं भवति इति ते अवगच्छन्ति। समुद्रलङ्घनचर्चायां जाम्बवान् वायुपुत्रं हनूमन्तं स्ववाक्यैः प्रेरयति। 'मम शक्तिः नास्ति, अहं किमपि कर्तुं न शक्नोमि' इत्यनया भावनया उपविष्टः हनूमान् जाम्बवतः वचनैः प्रेरितो भवति। छात्राणाम् आत्मविश्वासं वर्धयितुं पाठोऽयमुपकरोति।

**पाठस्य नाम** - हनूमत्प्रभावः।

**उद्देश्यम्** - व्यक्तित्वविकासदायकाः नैके सन्दर्भाः काव्य-इतिहासादिषु सन्ति इति प्रत्यभिज्ञानार्थम्।

कालांशः - १२

आधारग्रन्थसूची - वाल्मीकिरामायणम्।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| काव्यम् | | |
| व्यक्तित्वविकासः। | श्लोकालपनं करोति। | तालभावसमन्वितं काव्यमालपति। |
| इतिहासयोः आभिमुख्यम्। | श्लोकानाम् अन्वयं लिखति। | काव्यं पठित्वा अन्वयं लिखति। |
| श्लोकानां गद्यक्रमलेखनम्। | सम्बोधनरूपाणां चयनं करोति। | सम्बोधनरूपाणि चित्वा लिखति। |
| पदार्थानां ज्ञानम्। | आशयं लिखति। | काव्यसारांशं लिखति। |
| पदविश्लेषणम्। | धात्वादीनां लेखनं करोति। | क्रियापदानां धातुपदलकारपुरुषवचनानि लिखति। |
| सम्बोधनरूपाणां ज्ञानम्। | | |
| आशयकथनम् | | |
| धात्वादीनां ज्ञानम्। | | |

**प्रवर्तनम् - १**

**श्लोकालपनम्।**

**उद्देश्यम्** - श्लोकालपने तात्पर्यं जनयति।

**प्रक्रिया**

अध्यापिका श्लोकानां तालानुसारम् आलपनाय छात्रान् प्रेरयतु। आलपनावसरे अक्षरशुद्धिः, पदच्छेदः, तालक्रमादिकं च परीक्षताम्। पुनः श्लिष्टपदानां पदच्छेदकरणाय निर्दिशतु।

| | | |
|---|---|---|
| सर्वशास्त्रविदां वर | - | सर्वशास्त्रविदाम् + वर। |
| समो ह्यसि | - | समः + हि + असि। |
| मारुतस्यौरसः | - | मारुतस्य + औरसः। |
| वायुसुतो वत्स | - | वायुसुतः + वत्स। |
| गतिस्तव | - | गतिः + तव। |
| प्रहर्षयंस्ताम् | - | प्रहर्षयन् + ताम्। |

पदच्छेदस्य अवगमनानन्तरं श्लोकान् वैयक्तिकतया आलपति। तत्समये यत्र छात्राणां संशयः भवति तत्र संशयनिवारणाय छात्रान् एव प्रेरयतु। अन्ते एकेन तालेन समीचीनया रीत्या श्लोकं पूर्णतया आलपितुं छात्राः यतन्ते। अनन्तरं वैयक्तिकदृष्ट्या श्लोकालपनाय अवसरं ददातु। तदानीं छात्राः सतालं श्लोकम् आलपन्ति। तथापि केचन छात्राः आलपने क्लेशम् अनुभवन्ति चेत् तानुद्दिश्य सान्द्रमुद्रिकाद्वारा श्लोकानां श्रवणाय अवसरं ददातु।

**मूल्यनिर्णयसूचिकाः**

उचिततालेन आलपनम्।

अक्षरस्फुटता।

आशयावबोधः।

**प्रवर्तनम् - २**

**श्लोकानां गद्यक्रमलेखनम्।**

उद्देश्यम् - श्लोकानाम् अन्वयलेखनम् आशयावगमनम् च।

**प्रक्रिया**

अध्यापकः इच्छानुसारं छात्रान् सङ्घान् करोतु। अनन्तरं पाठभागस्थां पदसूचीमनुसृत्य श्लोकस्थपदानाम् अर्थलेखनाय निर्दिशतु। अर्थावगमनानन्तरं श्लोकस्य आशयं मातृभाषया कथनाय प्रेरयतु। अनन्तरं पाठभागस्थां पदसूचिम् अनुसृत्य आशयानुसारम् अन्वयलेखनाय निर्दिशतु।

**गद्यक्रमः**

१. (हे) वानरलोकस्य वीर! सर्वशास्त्रविदां वर! हनूमन्! तूष्णीम् एकान्तम् आश्रित्य किं न जल्पसि?

२. हनूमन्! हि हरिराजस्य सुग्रीवस्य समः असि। तेजसा बलेन च रामलक्ष्मणयोः च अपि (समः असि)

३. (हे) हरिपुङ्गव! बलं, बुद्धिः, तेजः, सत्वं च सर्वभूतेषु विशिष्टम् आत्मानं किं न बुद्ध्यसे?

४. मारुतस्य औरसः पुत्रः तेजसा च तत्समः अपि वत्स! हि त्वं वायुपुत्रः प्लवने तत्समः अपि (असि)।

५. (हे) हरिशार्दूल! उत्तिष्ठ, महार्णवं लङ्घयस्व। हनूमन्! तव या हतिः (सा) सर्वभूतानां परा हि।

६. ततः कपीनाम् ऋषभेण चोदितः प्रतीतवेगः पवनात्मजः कपिः तदा तां हरिवीरवाहिनीं प्रहर्षयन् पवनात्मजः वास्तविकं रूपं चकार।

**प्रवर्तनम् - ३**

**सम्बोधनरूपाणां चयनम्।**

**उद्देश्यम्** - सम्बोधनरूपाणाम् अवगमनम्।

**प्रक्रिया**

छात्रैः सह चर्चारूपेण प्रवर्तनमिदं कर्तुं शक्यते। अध्यापकः एकैकं छात्रमुद्दिश्य 'हे दिनेश उत्तिष्ठतु', 'हे रवे आगच्छतु', 'हे बाल उपविशतु' इत्यादीनि वाक्यानि वदतु। कक्ष्यायां तेषां वाक्यानाम् आधारेण छात्रेभ्यः एकैकं कर्म कारयतु। प्रयोगद्वारा अर्थं बोधयतु। एतेन प्रवर्तनेन 'हे' इति शब्दप्रयोगद्वारा विद्यमानसम्बोधनरूपाणां परिचयं कारयितुं शक्यते। तदनन्तरं तानि सम्बोधनपदानि श्यामफलके लिखतु। लेखनसमये द्वित्राणि पदानि पाठपुस्तके विद्यमानं सम्बोधनरूपमिव 'हे' शब्दं विना प्रदर्शयतु। यथा तत्र छात्राणां पक्षतः प्रश्नः भवति तत्र संशयनिवारणं कार्यम्। अनन्तरम् एतादृशपदानि अस्माकं पाठपुस्तके सन्ति वा इति पृच्छतु, चयनाय निर्दिशतु च। तानि पदानि अवतारयितुम् अवसरोऽपि दीयताम्। तस्मिन् समये अध्यापकः पदानि श्यामफलके / चार्ट्पत्रे लिखित्वा प्रदर्शयतु, लेखनाय निर्दिशतु च।

हे हनुमन्।

हे हरिपुङ्गव।

हे हरिशार्दूल

**मूल्यनिर्णयसूचिका**

उचितं सम्बोधनारूपम्।

**प्रवर्तनम् - ४**

**आशयलेखनम्।**

**उद्देश्यम्** - काव्यानाम् आशयलेखनसामर्थ्यम्।

**प्रक्रिया**

छात्राः सङ्घे उपविश्य सर्वेषां श्लोकानां वाचनं कुर्वन्तु। अनन्तरं पाठपुस्तके लिखितस्य अन्वयस्य आशयस्य च पठनाय निर्दिशतु। एकस्य श्लोकस्य आशयम् एकः संघः इति क्रमेण कक्ष्यायाम् अवतारयतु। अध्यापकः उचितं साहाय्यं करोतु। एवं प्रतिसंघम्

उपविश्य सर्वेषां सुभाषितानाम् आशयमधिकृत्य चर्चां प्रचालयतु। अनन्तरम् अध्यापकः आशयं दत्तसूचनानुसारं क्रमीकृत्य लेखनाय निर्देशं ददातु। लिखितान् आशयान् कक्ष्यायाम् अवतारयतु। अध्यापकेन स्खालित्यनिवारणाय अवश्यं साहाय्यं दातव्यम्।

आशयः - आदिकाव्यस्य रामायणस्य किष्किन्धाकाण्डे प्रसङ्गोऽयं दृश्यते। तत्र सीतान्वेषणसन्दर्भे सुग्रीवाज्ञया वानराः, जाम्बवतः नेतृत्वे दक्षिणसमुद्रतीरं प्राप्नुवन्ति। लङ्कागमनाय समुद्रलङ्घनम् अनिवार्यं मत्वा कः समुद्रं लङ्घयेदित्यत्र चर्चा प्रवर्तते। वानरेषु केचन समुद्रलङ्घने सिद्धाः भवन्ति। किन्तु जाम्बवान् जानाति स्म यत् हनूमता एव कार्यं साध्यम् इति। स तु तूष्णीम् उपविशति। तस्य उत्साहवर्धनाय जाम्बवता इमानि वाक्यानि उच्यन्ते -

"हनूमन्, वानरलोकस्य शूरः, शास्त्रपण्डितेषु श्रेष्ठः, भवान् किमर्थं एकाकी सन् उपविशति? भवान् किष्किन्धाधिपस्य सुग्रीवस्य सदृशः, शक्त्या रामलक्ष्मणयोः च अपि समः असि। भवतः शरीरशक्तिः, बुद्धिः, प्रभावः, वीर्यं च सर्वेभ्यः विभिन्नः इति न जानासि वा? वायुपुत्रः भवान् पराक्रमे वीर्ये च वायुतुल्यः भवति। अञ्जनासुत! सर्वजीविनां उत्कर्षाय त्वं समुद्रलङ्घनं कुरु" इति। अनन्तरम् अतीव वेगवान् हनूमान् जाम्बवतः प्रेरणया स्वस्य वास्तविकं रूपं प्रदर्शयामास।

**मूल्यनिर्णयसूचिके**

उचितया रीत्या आशयलेखनम्।

पौर्वापर्यक्रमः।

**प्रवर्तनम् ५**

**धातुलकारपुरुषवचनानां लेखनम्।**

**उद्देश्यम्** - धातुपदलकारपुरुषवचनानां ज्ञानम्।

**प्रक्रिया** -

छात्रान् अनुबन्धवाचनाय निर्दिशतु। अनुबन्धे विद्यमानानि कानि कानि वाक्यानि पाठभागस्थानि इति निरीक्षन्तु ते। तदानीं तूष्णीम्, आश्रित्य, हनुमान्, बुध्यसे, लङ्घयस्व, चकार इत्यादीनि पदानि छात्राः वदन्ति। अध्यापकः तानि पदानि श्यामफलके लिखतु। अनन्तरम् अव्ययानि अमरकोशं च परिचाय्य पदानाम् अर्थम् आशयं च बोधयित्वा नामरूपाणां धातुरूपाणां वाचनाय निर्दिशतु। पाठभागे विद्यमानानि नामपदानि धातुरूपपदानि च विवेचयन्तु छात्राः। तदर्थं निर्दिशतु। अवश्यं साहाय्यं ददातु।

उदा - बुध्यसे - बुध् अवगमने धातुः आत्मनेपदी लट् मध्यमपुरुष एकवचनम्।

लङ्घयस्व - लघि अतिक्रमणे धातुः आत्मनेपदी लोट् म. पु . ए. व।

चकार टुकृञ् करणे धातुः उभयपदी लिट्। (अत्र परस्मैपदी प्र.पु.ए.व)।

**मूल्यनिर्णयसूचिका**

क्रियापदानां विवेचनसामर्थ्यम्।

**संस्कृतभाषायां प्रायेण द्विसहस्रं धातवः। तेषु एकैकस्यापि दश लकाराः च वर्तन्ते।**

**'लट् वर्तमाने लेट् वेदे, भूते लङ्, लुङ् लिटस्तथा।**
**विध्याशिषोस्तु लिङ्लोटौ लुट् लृट्, लृङ् च भविष्यति'।**

**अधिकविस्तरांशः।**

भू धातुः परस्मैपदी लट् (वर्तमानकालः)

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्र.पु | भवति | भवतः | भवन्ति |
| म.पु | भवसि | भवथः | भवथ |
| उ.पु | भवामि | भवावः | भवामः। |

लिट् (परोक्षभूतार्थः)

| | | | |
|---|---|---|---|
| प्र.पु | बभूव | बभूवतुः | बभुवुः |
| म.पु | बभूविथ | बभूवथुः | बभूव |
| उ.पु | बभूव | बभूविव | बभूविम। |

लुट् (अनद्यतनभविष्यदर्थः)

| | | | |
|---|---|---|---|
| प्र.पु | भविता | भवितारौ | भवितारः |
| म.पु | भवितासि | भवितास्थः | भवितास्थ |
| उ.पु | भवितास्मि | भवितास्वः | भवितास्मः |

लृट् (भविष्यदर्थः)

| | | | |
|---|---|---|---|
| प्र.पु. | भविष्यति | भविष्यतः | भविष्यन्ति |
| म.पु. | भविष्यसि | भविष्यथः | भविष्यथ |
| उ.पु | भविष्यामि | भविष्यावः | भविष्यामः |

लोट् (प्रार्थना, विधिः)

| | | | |
|---|---|---|---|
| प्र.पु | भवतु-भवतात् | भवतां | भवन्तु |
| म.पु | भव-भवतात् | भवतं | भवत |
| उ.पु. | भवानि | भवाव | भवाम |

लङ् (भूतकालः)

| | | | |
|---|---|---|---|
| प्र.पु | अभवत् | अभवताम् | अभवन् |
| म.पु | अभवः | अभवतम् | अभवत |
| उ.पु | अभवम् | अभवाव | अभवाम |

विधिलिङ् (विधि, प्रार्थनाद्यर्थकः)

| | | | |
|---|---|---|---|
| प्र.पु | भवेत् | भवेताम् | भवेयुः |
| म.पु | भवेः | भवेतम् | भवेत |
| उ.पु | भवेयम् | भवेव | भवेम |

आशीर्लिङ् (आशीरर्थः)

| | | | |
|---|---|---|---|
| प्र.पु | भूयात् | भूयास्ताम् | भूयासुः |
| म.पु | भूयाः | भूयास्तं | भूयास्त |
| उ.पु | भूयासम् | भूयास्व | भूयास्म |

लुङ् (अनद्यतने भूतार्थः)

| | | | |
|---|---|---|---|
| प्र.पु | अभूत् | अभूताम् | अभूवन् |
| म.पु | अभूः | अभूतम् | अभूत |
| उ.पु | अभूवम् | अभूव | अभूम |

लृङ् (क्रियायाम् अनिष्पत्तौ अर्थे भूते भाविनि च) हेतुहेतुमद्भावे

| | | | |
|---|---|---|---|
| प्र.पु. | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| म.पु. | अभविष्यः | अभविष्यतम् | अभविष्यत |
| उ.पु | अभविष्यम् | अभविष्याव | अभविष्याम। |

**रामायणम्।**

रामायणे सप्त काण्डाः सन्ति। बालकाण्डः, अयोध्याकाण्डः, आरण्यकाण्डः, किष्किन्धाकाण्डः, सुन्दरकाण्डः, युद्धकाण्डः, उत्तरकाण्डः चेति।

काण्डशः कथासंक्षेपः

| | |
|---|---|
| बालकाण्डः | अयोध्यावर्णना, दशरथवर्णना, पुत्रकामेष्टिः, रामादीनामुत्पत्तिः, ताटकावधः, सीतास्वयंवरः, अयोध्याप्रत्यागमनं च। |
| अयोध्याकाण्डः | रामाभिषेकचिन्तनाद् आरभ्य पादुकस्वीकारपर्यन्ता कथा। |
| आरण्यकाण्डः | पञ्चवटीप्रवेशाद् आरभ्य जटायुदर्शनपर्यन्ता कथा। |
| किष्किन्धाकाण्डः | पम्पावर्णनादारभ्य सीतान्वेषणाय वानरनियोगं यावत्। |
| सुन्दरकाण्डः | हनूमतः सागरलङ्घनादारभ्य हनूमत्प्रत्यागमनपर्यन्ता कथा। |
| युद्धकाण्डः | सेतुबन्धनतः रामस्य प्रत्यागमनं यावत्। |
| उत्तरकाण्डः | जनापवादेन सीतापरित्यागः, ततो वाल्मीकेराश्रमप्रवेशः, लवकुशयोः जननं, तयोः यज्ञागमनं, रामायणालपनं,सीतायाः अन्तर्धानञ्च। |

**आशयलेखनम्।**

निर्देशः

हनुमत्प्रभावः इति पाठभागस्थश्लोकानां पठनानन्तरम् आशयलेखनाय निर्दिशतु।

# ഹനുമാൻ

വായുദേവന്റെ പുത്രനാണ് ഹനുമാൻ. (നിത്യബ്രഹ്മചാരി, ചിരഞ്ജീവി, ശ്രീരാമഭക്തൻ, ശക്തിമാൻ, വേദാന്തി).

ഒരിക്കൽ പാർവതീപരമേശ്വരൻമാർ വാനരരൂപികളായി വനത്തിൽ കളിച്ചുനടന്നഘട്ടത്തിൽ പാർവതി ഗർഭം ധരിച്ചു. ഒരു കുരങ്ങിന്റെ അമ്മയാകേണ്ടിവരുമല്ലോ എന്ന ദുഃഖമകററുവാൻ ശിവൻ തന്റെ യോഗശക്തികൊണ്ട് പാർവതിയുടെ ഗർഭസ്ഥശിശുവിനെ ആവാഹിച്ചെടുത്ത് വായുവിന്റെ പക്കൽ ഏൽപിച്ചു. വായുദേവൻ ആ പൂർണ്ണഗർഭത്തെ കുഞ്ജരൻ എന്ന മഹാവാനരന്റെ മകളായ അഞ്ജനയിൽ നിക്ഷേപിച്ചു.

പൂർവജൻമത്തിൽ ദേവഗുരുവായ ബൃഹസ്പതിയുടെ ദാസിയായിരുന്ന പുഞ്ജികസ്ഥലയാണ് അഞ്ജനയായി ജനിച്ചത്. ആ സമയം കിഷ്കിന്ധ ഭരിച്ചിരുന്നത് ഇന്ദ്രപുത്രനായ ബാലിയായിരുന്നു. ശിവന്റെ ബീജത്തിൽ ജനിച്ച പുത്രൻ തന്റെ സ്ഥാനത്തെ നഷ്ടപ്പെടുത്തുമെന്ന് ഭയന്ന് ബാലി, പഞ്ചലോഹമുരുക്കി അഞ്ജനപോലുമറിയാതെ അവളുടെ ഗർഭത്തിലൊഴിച്ചു. എന്നാൽ സംഹാരമൂർത്തിയുടെ തേജസ്സോടുകൂടിയ ആ ശിശുവിന് ജൻമനാ പഞ്ചലോഹം ഒരു കർണ്ണാഭരണമായിത്തീർന്നു.

മഹാമേരുവിന് തെക്കുള്ള കനകം എന്ന വനത്തിലാണ് ഹനുമാൻ ജനിച്ചത്. (പ്രസവം കഴിഞ്ഞതോടെ അഞ്ജന വാനരരൂപം വെടിഞ്ഞ് പുഞ്ജികസ്ഥലയായി.) കാട്ടിലെ കായ്കളും, പഴങ്ങളും നിനക്ക് ഇഷ്ടപ്പെട്ട ആഹാരമായിത്തീരും എന്നനുഗ്രഹിച്ച് പുഞ്ജരികസ്ഥല സ്വർഗലോകത്തേക്ക് പോയി.

സൂര്യനെക്കണ്ട് പഴമാണെന്ന് കരുതി അത് കഴിക്കാനായി ശ്രമിച്ചപ്പോൾ അനേകം പഴങ്ങൾ കാണാനിടയായി. ഈ സമയം ദേവേന്ദ്രൻ ഐരാവതത്തിലേറി അവിടെ എത്തി. മറ്റൊരു പഴമാണെന്ന് കരുതി പിടിക്കാനൊരുങ്ങിയപ്പോൾ സ്വർഗ്ഗത്തെ ആക്രമിക്കാനൊരുങ്ങുകയാണെന്ന് തെറ്റിദ്ധരിച്ച് ഇന്ദ്രൻ തന്റെ വജ്രായുധം പ്രയോഗിച്ചു. ആയുധം താടിയിൽ തട്ടി കുഞ്ഞ് താഴെ വീണു. ആയുധം ഹനുവിൽ തട്ടിയതിനാൽ അന്നുമുതൽ ഹനുമാൻ എന്നറിയപ്പെട്ടു. താടിയിൽ മുറിവേറ്റ് ബോധരഹിതനായ കുഞ്ഞ് വായുഭഗവാന്റെ മടിയിൽ ചെന്നുവീണു.

ദേവേന്ദ്രനെ ഒരു പാഠം പഠിപ്പിക്കാനായി വായുഭഗവാൻ കുഞ്ഞിനെയും കൊണ്ട് പാതാളത്തിലൊളിച്ചു. വായുവിന്റെ അഭാവത്തിൽ സർവ്വജീവജാലങ്ങളും നശിച്ചുതുടങ്ങി. ദേവൻമാർ എല്ലായിടത്തും വായുഭഗവാനെ അന്വേഷിച്ചു. ഒടുവിൽ ദേവേന്ദ്രൻ പാതാളത്തിലെത്തി ക്ഷമ ചോദിച്ചു. തുടർന്ന് കുഞ്ഞിനെയും കൊണ്ട് വായുഭഗവാൻ പുറത്തുവന്നു. 'ബ്രഹ്മമുള്ളകാലം ആയുഷ്മാനായി ഭവിക്കും, ഗരുഡനിൽക്കവിഞ്ഞ കായബലം സ്വന്തമാകും, വിശ്വം ജയിക്കുന്ന വീരപരാക്രമിയായി വാഴും, അഗ്നി ഒരിക്കലും ബാധിക്കാതിരിക്കട്ടെ, മൃത്യുവിന് അടിമപ്പെടാതിരിക്കട്ടെ, വായുവേഗത്തിൽ സഞ്ചരിക്കുന്നവനാകട്ടെ' എന്നീ അനുഗ്രഹങ്ങളും നൽകിയിട്ട് വായുഭഗവാൻ തന്റെ പുത്രനെ കേസരിയെ (അഞ്ജനയുടെ ഭർത്താവ്) ഏൽപ്പിച്ചിട്ട് മറഞ്ഞ്പോയി.

കൗമാരം കൈവന്ന ഹനുമാൻ, സൂര്യഭഗവാന് അഭിമുഖമായി നിന്നുകൊണ്ട് സൂര്യഗതിക്കൊപ്പം പുറകോട്ട് സഞ്ചരിച്ചു. അറുപത് നാഴികക്കുള്ളിൽ സൂര്യനിൽനിന്ന് സകലവേദങ്ങളും ഹൃദിസ്ഥമാക്കി. സൂര്യഭഗവാൻ ഹനുമാനോട് ഗുരുദക്ഷിണ ആവശ്യപ്പെടുന്നു. നിന്റെ വംശത്തിൽ പിറന്നവനും എന്റെ മകനുമായ സുഗ്രീവൻ ബാലിയോടൊപ്പം കിഷ്കിന്ധയിൽ വസിച്ചുവരുന്നു. ദുർബലനായ അവന്റെ മന്ത്രിയും, സഹചാരിയുമായി നടന്ന് നീ അവനെ സഹായിക്കുക . അങ്ങനെ ഹനുമാൻ കിഷ്കിന്ധയിലെത്തി സുഗ്രീവന്റെ മന്ത്രിയായി. ഈ സമയം സീതയെ അന്വേഷിച്ച് രാമലക്ഷ്മണൻമാർ അവിടെ എത്തിച്ചേർന്നു. സീതാന്വേഷണത്തിന് രാമലക്ഷ്മണൻമാരെ സഹായിക്കാമെന്നും പകരമായി തനിക്ക് ബാലിയിൽ നിന്ന് രാജ്യം വീണ്ടെടുത്ത് തരണമെന്നും സുഗ്രീവൻ രാമനുമായി സന്ധിചെയ്തു.

സീതാന്വേഷണത്തിൽ സമുദ്രം ചാടിക്കടന്ന് ഹനുമാൻ ലങ്കയിലെത്തി. സീതയെ ആശ്വസിപ്പിച്ച് ഉദ്യാനം തകർത്ത് രാവണപുത്രനായ അക്ഷകുമാരനെ വധിച്ച് ലങ്ക മുഴുവൻ തീവച്ച് നശിപ്പിച്ച് ശ്രീരാമനെ ഹനുമാൻ സഹായിച്ചിട്ടുണ്ട്. രാമലക്ഷ്മണൻമാർക്ക് വേണ്ടി ഹിമാലയത്തിൽ പോയി ഔഷധങ്ങൾ കൊണ്ടുവന്ന്, രാവണവധാനന്തരം ഹനുമാൻ രാമനോടൊപ്പം അയോധ്യയിലേക്ക് പോവുകയും രാമഭക്തനായ ഹനുമാൻ ചിരഞ്ജീവിയായിമാറി, കദളീവനത്തിലെത്തി രാമനാമങ്ങൾ ജപിച്ചുകൊണ്ട് കഴിഞ്ഞുവരുന്നു.

**അംഗദൻ –** ബാലിപുത്രൻ.

**ജാംബവാൻ –** സുഗ്രീവന്റെ മന്ത്രിയും അതീവശക്തമാനുംബ്രഹ്മാവിന്റെ പുത്രനുമായ വാനരശ്രേഷ്ഠൻ.